JOURNAL
OF
MANUSCRIPT STUDIES

Vol. XXIV Nos. 1 and 2. 1983

Editor
Dr. T. BHASKARAN
Joint Editor
S. MURALIDHARAN NAYAR

Oriental Research Institute and Manuscripts Library
University of Kerala, Kariavattom, Trivandrum.

चार्वाकादिमतनिरूपणम्

सर्वानर्थकरादस्मात्
संसारान्मुक्तिरिष्यते ।
सा त्वेषा तदुपायाश्च
कथ्यन्ते बहुधा बुधैः ॥

चार्वाकैस्तु अप्रयत्नसाध्या मुक्तिरभिधीयते, मरणात्मकत्वात् । न खलु मरणं प्रयत्नसाध्यम्, अवश्यंभावित्वात् । ते हि अन्येषां दर्शनकारिणां विडम्बकाः नास्तिकाः बार्हस्पत्याः लोकायतिका इति संज्ञाभिः प्रख्याता भवन्ति । तेषां तावत् पृथिव्यप्तेजोवायव इति चत्वार्येव भूतानि । न त्वाकाशं मूर्तद्रव्याभावरूपत्वात् । आत्मा च देहव्यतिरिक्तो नास्ति । अत एव नान्यः परलोकः । परमात्मा च परमेश्वरापरपर्यायो न भवति । स्वर्गनरकादिकं च न विद्यते । प्रत्यक्षमेकमेव प्रमाणम्, न त्वनुमानादिकम् ।

आगमस्तु (त्रयी ?) धूर्तप्रलापः । सत्यादिकं सुतरामप्रमाणम् । सर्वत्र शब्दस्यार्थेनाप्रतिबन्धो हेतुः । स्वर्गानुभवो मृष्टभोजनादिकम् । अर्थकामौ द्वावेव पुरुषार्थौ । काम एव वा । तस्मात् कृषिगोरक्षावाणिज्यादिभिरुपायैरर्थं लब्ध्वा यावज्जीवति तावत् सुखेनैव वर्तितुं यतेत ।

जैनाः

आर्हताः, जैनाः, नग्नाः, क्षपणकाः, पुद्गलवादिनः इति पर्यायाः । तेषां त्रीणि प्रमाणानि, प्रत्यक्षानुमानागमश्चेति । एषां परलोकोऽस्ति ।

स्वर्गनरकौ च पुण्यपापौ च। ईश्वरोऽप्यस्ति। स तु जगतां स्रष्टा पालकः संहर्ता च न भवति। केवलं ज्ञानोपदेशमेव करोति। आत्मा च देहव्यतिरिक्तोऽस्ति। स तु देहपरिमित इति केचित्। दीपमुकुल इव परिमितो हृदयदेशस्थ इत्यन्ये। तस्यात्मनो निरावरणता मुक्तिः। सा च सततोर्ध्वगमनं। तत्परमाकाशे। परमाकाशं च नित्यं निरधिकं सूक्ष्मं निर्मलं च। वाङ्मनःकायैः सर्वेषां प्राणिनामनुपद्रवः परमो धर्मः। वेदाः पुनरप्रमाणम्। ब्राह्मणादिवर्णाश्रमाश्च न सन्ति। सुतरां मतन्निषेवणं पापम्। ब्रह्मचर्यं महाधर्मः।

बौद्धाः

वैभाषिकःसौत्रान्तिको योगाचारो माध्यमिकश्चेति चत्वारोऽनुबन्धाः। महायानिक इति कश्चिदन्तरालिकः पञ्चमः। एषामपि वेदो न प्रमाणम्। ब्राह्मणादिवर्णाश्रमाश्च न सन्ति। परलोकोऽस्ति स्वर्गनरकादिकञ्च। तेषां ज्ञानमेवास्ति। आत्मा नास्ति कर्ता। क्रिया त्वस्ति। तत्र माध्यमिकस्य शून्यभावना मोक्षसाधनं, सर्वं शून्यमिति सिद्धान्तः। शून्यतापत्तिर्मोक्षः।

योगाचारः सौत्रान्तिकः

अन्येषां बौद्धानां शुद्धबुद्ध्यवशेषो मोक्षः। बुद्धेः शुद्धिः नीलापीतत्वमहं भूमिर्जलमग्निरित्याद्याकारविरहः।

योगाचारस्य बुद्धिरेव नास्ति। न तु लोकबाधा बोद्धव्यं च। अतः शुद्धविज्ञानं च, बाह्ये चायम्। इति योगाचारपक्षः।

सौत्रान्तिकस्य अनुमेयत्वेन बाह्यार्थोऽस्ति, न तु प्रत्यक्षत्वेन। प्रत्यक्षन्तु ज्ञानमेकमेव। तत्र प्रतीयमानेन नीलादिरूपेण बाह्यार्थो नित्यमनुमीयते। न खलु स्वतः स्वच्छस्वभावस्य ज्ञानस्य नीलपीताद्याकाराद्भवो युज्यते। इति सौत्रान्तिकपक्षः।

वैभाषिकः

वैभाषिकस्य ज्ञानाद् बाह्यः प्रत्यक्षप्रमाणगम्यो अर्थो विद्यते। स तु क्षणिक इत्येष विशेषः, अर्थस्य क्षणिकत्वात्। कर्तृकरणकर्मक्रियाणां पृथग्भावः। इति वैभाषिकमतम्।

वैशेषिकः

अथ वैशेषिकपक्षः। द्विधा पदार्थः भावः अभावश्चेति। भावः षोढा द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवाय इति। अभावश्चतुर्धा प्रागभावः (प्रध्वंसाभावः) इतरेतराभावः, अत्यन्ताभावश्चेति। अत्र प्रमाणं द्विधा प्रत्यक्षमनुमानं चेति। आगमः- आगमस्यानुमानेऽन्तर्भावः। आत्मा नाना जीवपरभेदेन। जीवाः बहवः सुरनरतिर्यगादिभेदात्। परमात्मा एकः सकलजगत्सृष्टिस्थितिसंहारकर्ता नित्यः सर्वज्ञः निष्कलः सर्वव्यापी परमेश्वरापरपर्यायः। तद्विरचितत्वाद्वेदाः प्रमाणम्। परलोकस्वर्गनरकादिकं धर्माधर्मौ ब्राह्मणादिवर्णाश्रमाश्च सन्ति। निषिद्धकाम्यवैमुख्येन विहितकर्मानुष्ठानद्वारा ईश्वरोपासिना अनुष्ठानम्। ततो नवगुणोच्छित्त्या दुःखात्यन्तसमुच्छेदो मोक्षः। बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा इति नवगुणा। नवगुणोच्छित्तौ कैवल्येनात्मनः पाषाणवदवस्थानं मोक्षः। इति वैशेषिकपक्षः।

नैयायिकाः

अथ नैयायिकपक्षः। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभासछलजातिनिग्रहस्थानानि षोडश पदार्थाः। प्रत्यक्षमनुमानमुपमानमागमश्चेति चत्वारि प्रमाणानि। केषाञ्चिदनुमानं विना त्रीण्येव। चेतन आत्मा। स नाना जीवपरभेदेन। जीवा बहवः सुरनरतिर्यगादिभेदात्। परस्त्वेक एव परमेश्वरापरपर्यायः

सर्वज्ञो नित्यः सकलजगत्सृष्ट्यादिकर्ता। तत्कृतत्वादेव वेदाः प्रमाणम्। वेदस्मृतिपुराणादिकं ईश्वरवचनमेव। तदुक्तं कर्मानुष्ठानादीश्वरप्रीतौ सत्यां विशिष्येश्वरसमाराधनाच्च ईश्वरानुग्रहेण जन्तोर्मोक्षो भवति। मोक्षश्च शरीरेन्द्रियादिविग्रहेण नित्यनिरवधिकलोकोत्तरपरमानन्दानुभवः। केषाञ्चित्पाषाणवदवस्थानम्। तत्र योगः परमसाधनम्। योगस्य चाङ्गानि यमनियमादीन्यष्टौ। इति नैयायिकपक्षः।

भाट्टाः

अथ भाट्टपक्षः। द्रव्यं, गुणः, कर्म, सामान्यमिति चत्वारः पदार्थाः। तत्र द्रव्याणि दश शब्दतमोभ्यां सह। गुणादयो यथाप्रसिद्धिर्द्रष्टव्याः। प्रत्यक्षमनुमानमुपमानमागमोऽर्थापत्तिरभावश्चेति षट् प्रमाणानि वेदेनैकेनैव धर्माधर्मौ ज्ञातव्यौ, न च शब्दान्तरेण, न च प्रत्यक्षादिना, न च योगिज्ञानेन, योगिनामभावात्। न खल्विन्द्रियान्तरेण। शब्दविषयान्तरमजानन् सर्वज्ञो वा योगी दृश्यते। प्रत्यक्षादिप्रमाणषट्केन धर्मो ज्ञातुं शक्यतेऽपौरुषेयवचनेन च। अपि तर्हि वेदेनैव धर्मो ज्ञेयः, वेदविहितमेवानुष्ठेयम्। तत्र काम्यं निषिद्धं च कर्म न कर्तव्यम्। नित्यनैमित्तिकं चैव कर्तव्यम। तेनैव प्रत्यवायपरिहारो भवति। वेदश्चापौरुषेयो नित्यः। पौरुषेयत्वे तस्याप्रमाण्यमापतेत पुरुषाणां रागादिमत्त्वात्। यत्पुनरीश्वरकृतत्वाद्वेदः प्रमाणमित्युच्यते तन्न युक्तम् ईश्वरस्यैवाप्रामाणिकत्वात्। ननु जगल्लिङ्गेन सोऽनुमातुं शक्यते, जगतो नित्यत्वेन कार्यत्वाभावात्। एकदेशविनाशस्तु न प्रयोजकः। आगमेनापि ईश्वरो न कल्पनीयः, अन्योन्याश्रयत्वप्रसङ्गात्। आगमेन हीश्वरः साध्यते। ईश्वरकृतत्वेनागमस्य प्रामाण्यमवगम्यते इति। तस्मान्नित्यवेदैकविहितनित्यनैमित्तिककर्मानुष्ठानेन शुद्धान्तःकरण आत्मा

ज्ञातव्य इत्यादि वेदचोदितपरमात्मावगमेन नियमाद्यष्टाङ्गसम्पूर्णयोग-परिशीलनवशात् परमात्मानं साक्षात्कृत्य पुरुषो मुक्तिं लभते। मुक्तौ च निरवधिको लोकोत्तरः परमानन्दानुभवोऽस्तीति भाट्टपक्षः।

सांख्यः

अथ सांख्यसिद्धान्तः। सांख्यशास्त्रं द्विधा सेश्वरं निरीश्वरं चेति। निरीश्वरं कापिलं—कपिलेन महर्षिणा कृतं सांख्यमित्येवोच्यते। सेश्वर भगवता पतञ्जलिना कृतम्। पातञ्जलं योगशास्त्रं योग इति कथ्यते।

तत्र कपिलो ज्ञानेन मुक्तिरित्याह। योगेन मुक्तिरिति पतञ्जलिः। उभयपक्षेऽपि पञ्चविंशतिस्तत्त्वानि, पुरुषः, प्रकृतिः, महान् अहङ्कारः, शब्दः, स्पर्शो, रूपः, रसः, गन्धः, श्रोत्रं, त्वक्, चक्षुः, जिह्वा, घ्राणं, वाक्, पाणिः, पादः, पायुः, उपस्थः, मनः, पृथिवी, आपः, तेजः, वायुः आकाश इति।

अथ निरीश्वरसिद्धान्तः

पुरुषास्तावत् बहवः। ते प्रकृतिरपि न भवन्ति। विकृतिरपि। "न प्रकृतिर्न विकृति"रित्युक्तम्। एते खलु प्रकृतौ प्रलये लीयन्ते। प्रकृतौ च सूक्ष्मरूपेण निखिलमिदं जगदवस्थितम्। सा च प्रकृतिर्गुण-साम्या नित्या एका जडा। पुरुषस्तु चेतनः कर्ता च। तद्योगात् प्रकृतेः चेतनत्वं कर्तृत्वञ्च। सत्त्वं, रजः, तम इति त्रयो गुणाः। प्रकृतेरेव भोक्तृत्वम्। सङ्गाद्धीनः पुरुषः। प्रकृतेर्भोगः पुरुषे सङ्क्रामति। तयोः पंग्वन्धवद्योगः। ततः प्रकृतौ महत्तत्त्वं बुद्ध्यपरपर्यायमुत्पद्यते। सा च बुद्धिस्त्रिगुणा भवति गुणत्रयसाम्यरूपात् प्रकृतित्वात् जातत्वात्। यथा शुक्लतन्तुभ्यो जातः पटः शुक्लो भवति। महत्तत्त्वादहङ्कारः अहङ्कारा-त्तन्मात्राणि सूक्ष्मभूतानि शब्दस्पर्शरूपरसगन्धाख्यानि पञ्च भवन्ति।

तेभ्यः सत्त्वोत्कटानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि भवन्ति । तैः क्रमात् शब्दस्पर्शरूपरसगन्धाः विज्ञायन्ते ।

तेभ्यो रजोगुणोद्भवानि वाक्पाणिपादपायूपस्थसंज्ञानि पञ्च कर्मेन्द्रियाणि जायन्ते । तैः वचनादानगमनविसर्गानन्दाः क्रियन्ते । मनः पुनरन्तःकरणमेकादशमिन्द्रियम् । एतेभ्यः पुनः पृथिव्यप्तेजोवाय्वाकाशरूपाणि पञ्चमहाभूतानि समुद्भवन्ति । एतत्सर्वं प्रकृतौ स्थितं क्रमादभिव्यक्तमेव भवति । न तु पूर्वमसदुत्पद्यते । असदुत्पद्यते चेत् शशशृङ्गमप्युत्पद्येत । अभिव्यञ्जककारणैर्वस्तुनोऽभिव्यक्तिर्भवति । अतो जातोऽपि घटः पुनरपि जनयितव्य इति न चोदनीयः ।

आत्मानश्च बहवो देहे देहे व्यवस्थिताः । यदि पुनरेक एव भवेदात्मा एकस्मिन् मृते सर्वे अपि म्रियेरन् । जाते जायेरन् । पश्यति पश्येयुः ।

अत्र प्रमाणानि प्रत्यक्षमनुमानमागमश्चेति । एतैः पञ्चविंशतितत्त्वानि सम्यग् विज्ञातव्यानि । तत एव स्फुटमात्मज्ञानं स्यात् । तत्त्वपरिज्ञानपूर्वकात्मज्ञानादेव मोक्षः ।

ननु काम्यप्रतिषिद्धवर्जनेन विहितकर्मानुष्ठानादन्तःकरणपरिशुद्धौ क्रमान्नियमादिना मोक्ष इति ।

नैतद्युक्तम् । विहितान्यप्यग्निष्टोमादिकर्माणि प्रवर्तकत्वात् काम्यान्येव भवेयुः । ततस्तेभ्यो धर्मेणोर्ध्वगतिः पुंसां भवेत् । अधर्मेणाधोगतिर्भवेत् । (ननु) पुनर्ब्रह्मार्पणतया कृते यज्ञे मोक्ष इत्युच्यते । तत्र मन्त्रार्थस्यान्यथाकरणादयज्ञत्वं प्रसज्यते । तस्माद्यागाः संसारेषु प्रवर्तकाः न निवर्तकाः । अतस्तत्त्वज्ञानेनैव मोक्ष इति सांख्यपक्षः ।

अथ सेश्वरसांख्यसिद्धान्तः । तत्रापि पञ्चविंशतिस्तत्त्वानीति पूर्व-

मुक्तम् । ईश्वरः पुनरस्तीत्यस्य पक्षः । यदुक्तं "क्लेशकर्मविपाकाश-यैरपरामृष्टः पुरुषविशेष ईश्वर" इति । ज्ञानेन मुक्तिरित्येतदलसस्य वचनम् । सकलतत्त्वसम्यक्परिज्ञानपूर्वकयोगादेव मुक्तिसिद्धेः । न खलु योग-विज्ञानेनैव मुक्तिर्लब्धुं शक्यते । योग एव तस्य साधनम् । स तु मनोवृत्त्य साधरः । यदुक्तं "योगश्चित्तवृत्तिनिरोधः" इति । एवं विधो योग एवापवर्गसाधनम् । न तु ज्ञानमात्रम् । ज्ञानिनामपि योगाभावे क्वचित् दोषैर्बुद्धिभ्रमो भवेत् । योगिनस्तु गुरूपदिष्टमार्गेण प्रवृत्तस्य योगेनैव निखिला अपि दोषा विनश्यन्ति । न हि योगं विना कश्चिदपि दोषक्षयकर उपायो लभ्यते । अत्र देहेन्द्रियादिविरक्तोऽधिकारी ।

इह खलु विद्योपात्तकर्तृतया काम्यानि कर्माणि कुर्वतां देहिनां जातिरायुर्भोगादिश्च संभवन्ति । क्लेशाश्च पञ्च-अविद्या, रागः, द्वेषः, अस्मिता, अभिनिवेशश्चेति । तत्राविद्या एकैव कारणम् । अविद्या च विपरीतज्ञानम् । अनात्मनि देहे आत्मेति बुद्धिः । पञ्चभूतात्मके शरीरे देहोऽहमिति बुद्धिः । शरीरात् सञ्जातपुत्रपौत्रादिसन्तानेऽपि ममेति बुद्धिः । देहभोग्येषु गृहक्षेत्रादिषु ममेति बुद्धिः । एवंविधाया अविद्यायाः शास्त्राभ्यासात् गुरूपदेशाच्च बिनाशे तन्मूलरागादिषु नष्टेषु पुमान् विमुक्तये इहामुत्रफलनिरपेक्षो योगमभ्यसेत् । योगश्च द्विधा-क्रियायोगः साक्षाद्योगश्चेति । तत्र प्रथमं क्रियायोगं कुर्वीत । स तु त्रिधा-तपो मन्त्र-जप ईश्वरभक्तिश्चेति । तपः कृच्छ्रचान्द्रायणादि । मन्त्रजपः ईश्वरवाचकशब्दाभ्यासः । भक्तिः स्नेहविश्वासबहुमानरूपा । ईश्वरवाचक-शब्दः प्रणवः । तस्याभ्यासो वाच्यभावनम् । तस्य दोषा एते—
आलस्यम् तीव्रव्याधिः प्रमादः स्थानसंशयः अनवस्थितचित्तत्वं भ्रान्तिदर्शनमश्रद्धा दुःखनैर्मनस्यं विषयवाञ्छा श्वासप्रश्वासौ देहकम्प इत्यादयः ।

एते योगविघ्नाः । एतान् पुनरीश्वरप्रणिधानेन विनाशयेत् । मैत्र्यादिभिर्मनःशुद्धिं कुर्यात् । सर्वेषु जनेषु बन्धुभावो मैत्री । दुःखिते जने करुणा, धर्मे अनुमोदनं, पापिनामुपेक्षा, भावःक्षेत्रसेवा, सज्जनसङ्गतिः, भागवच्चरिताभ्यासः, परमात्मभावना इत्यादिभिर्मनःशुद्धिः स्यात् ।

अथ साक्षाद्योगः । तस्याष्टाङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इति । तत्र अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रहः इति यमाः पञ्च । शौचः सन्तोषः तपो मन्त्रेश्वरसेवा इति नियमाश्च पञ्च । स्थिरसुखमासनम् । तत् षड्विधम् पद्मभद्रमयूरवीरस्वस्तिक कुक्कुटभेदेन । एतैरासनैः सदा आसितव्यम् । प्राणापाननिरोधः प्राणायामः रेचकपूरककुम्भक इति त्रिधा । वायोः रेचनात् रेचकः । पूरणात् पूरकः । कुम्भवदवस्थानात् कुम्भकः । एतान् त्रीनपि हित्वा वायोर्निजस्थितिरूपः चतुर्थोऽपि प्राणायामोऽस्ति । स खल्वविद्यापापनाशनः । इन्द्रियाणां विषयेभ्यो निवर्तनं प्रत्याहारः । चित्तस्य देशे बन्धो धारणा । देशो द्विविधः बाह्यश्चाभ्यन्तरश्च । बाह्यः प्रतिमादिः । आभ्यन्तरश्च नाभिचक्रहृदादिः ।

तत्र चित्तस्य वृत्तिबन्धनं नाभिचक्रादिदेशेषु प्रत्ययस्यैकतानता ध्यानम् । तत्रैव मनसा शून्यवत् स्थितिः समाधिः । नियमादिभ्यः पञ्चभ्यः धारणादित्रयं भवति । धारणाध्यानाभ्यां समाधिः । एवं क्रमः । क्रमपरित्यागे हि कासश्वासप्रतिश्यायकर्णदन्ताक्षिवेदना मूकत्वजडत्वकासशिरोरोगादय उपद्रवाः भवन्ति । ईश्वरप्रसादेन योगलाभे एते उपद्रवा न भवन्ति । अत्र नाडीचक्रादिर्विज्ञेया । तत्र सुषुम्ना नाम प्रधाना नाडी । सा मध्यवंशास्थिमार्गेण शिरोगता । तत्पार्श्वद्वये इडा च पिङ्गला च द्वे नाड्यौ । इडा घ्राणस्य वामपुटगता चन्द्रस्य मार्गः । पिङ्गला तु दक्षिणपुटगता रवेर्मार्गः । कुहूरधोगता लिङ्गभूषण-

वायुप्राप्ता । विश्वोदरा वामकर: । वरणा दक्षिणकर: । हस्तिजिह्वा वामपाद: । यशस्विनी दक्षिणपाद: । सुषुम्नायाः पृष्ठतो निर्गते शङ्खिनी च पयस्विनी च कर्णौ । गान्धारा पूषा च वामदक्षिणे नेत्रे । ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च नाड्य: । प्राणादिवायुसञ्चारो नाडीष्वेव ।

एवं सर्वदा योगाभ्यासात् देहकान्तिः धैर्यं क्षुत्पिपासाद्यभावश्च संवत्सरार्धतो जायन्ते । यथेष्टचरितज्ञानं अतीताद्यर्थज्ञानं स्वशरीरेन्द्रियशुद्धिः जरामरणाभावः संसारान्निवृत्तिश्च चिरेण योगिनः स्युः । अणिमा महिमा लघिमा गरिमा वशित्वं प्राप्तिरीशिता प्राकाश्यं चेति अष्टैश्वर्याणि च भवन्ति । एतैः मुक्तिविरोधः योगनाशश्च इति पतञ्जलिपक्षः ।

व्यासः

अथ महाभारते व्यासपक्षः । प्रकृतिपुरुषात्मकं जगत् । प्रकृतिः गुणसाम्यम् । गुणाः सत्त्वरजस्तमांसि । पुरुषः पुरोगामी । तन्मात्राः सर्वभूतानि गुणत्रयमयानि । तत्र पुरुषस्य गुणावेशो बन्धः । गुणविवेकबुद्धिर्मुक्तिः । गुणवशादात्मा त्रिविधः उत्तममध्यमाधमभेदात् । तत्र दूर्वाश्यामत्वकफात्मकत्वगूढास्थिबन्धमहामनोधार्मिकमितभाषित्वादिकमुत्तमलक्षणम् । वैकृतपिङ्गकेशालपरोमकोपनपण्डितत्वादिकं मध्यमलक्षणम् । घातिकाधन्यमत्सरिदीर्घकृशकलहप्रियत्वादिकमधमलक्षणम् । शरीरं पञ्चभूतमयम् ।

चतुर्व्यूहात्मको विष्णुश्चतुर्धैवाकरोज्जगत्

इडा पिङ्गला सुषुम्ना च गान्धारी हस्तिजिह्विका
सुयशालम्बुसा पूषा कुहूश्चैव च शङ्खिनी
विमला घोषिणी पृथ्वी ततश्चाप्यायिनी मता
तेजोवती वायवी च नाड्यः षोडश कीर्तिताः—मालतीमाधवव्याख्याने
पूर्णसरस्वती ।।

समयाचारनिशेषकृत्यभेदैर्विमोहयन्
मोक्षदो विष्णुरेव स्याद्देवदैतेयरक्षसाम् ।
रजस्सत्त्वतमोमार्गैस्तदात्मातः स्वकर्मदः
प्राप्यते विष्णुरेवैको देवदैत्यनिशाचरैः ।
ब्रह्मविष्णुहराख्याभिः सृष्टिस्थितिलयानपि
हरिरेव करोत्येको रजस्सत्त्वतमोवशात् ।

देवाः सात्त्विकाः । असुराः राजसाः । राक्षसास्तामसाः । देवानां धर्मपक्षः । अधर्मोऽसुरपक्षः । पिशाचानां

"यस्मिन् पक्षे तु यो जातः
सुरो वाऽप्यसुरोपि वा
स धर्म एव तस्य स्या-
दधर्मोऽप्यत्र धर्मवत् ।

सात्त्विकैः वेदत्रयोक्तधर्मोऽनुष्ठेयः । राजसैः अथर्ववेदोक्तोऽयं धर्मः । तामसैरपि तथा । राजसैस्तामसैश्च ब्रह्मरुद्रौ पूज्यौ ।

निजधर्मपथा यातानानुगृह्णात्यसौ हरिः
मुच्यते निजधर्मेण परधर्मो भयावहः ।
एक एव परो विष्णुस्सुरासुरनिशाचरान्
त्रिगुणानुगुणान्नित्यमनुगृह्णातु लीलया ।

इति वेदव्यासमहाभारतपक्षः ।

वेदान्तसिद्धान्तः

अथ वेदान्तसिद्धान्तः । इह तावत् ब्रह्मार्पणबुद्ध्या तु धर्मैर्ब्रह्मज्ञानाधिकारिणा ब्रह्मजिज्ञासा कर्तव्या । नित्यानित्यविवेकः, इहामुत्रफलानपेक्षा शमो दमः मुमुक्षुत्वं च यस्य भवन्ति स एवात्र अधिकारी । विधिरेव प्रवर्तक इति न नियमः । इष्टसाधनताज्ञानमपि प्रवर्तकं भवति । न तु काम्यप्रतिषिद्धवर्णनेन विहितकर्मानुष्ठानात् । शुद्धान्तःकरणस्य पुंसो गुरुवाक्यानपेक्षया स्वयमेव ज्ञानं भवतीति ।

नैतत्, खलु केवलेन कर्मणा ज्ञानं भवेत्। किं तर्हि, गुरूपदेशादेव भवेत्। यदुक्तं—

प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धतां
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव।
प्रत्यक्प्रवणबुद्धेस्तु ब्रह्मज्ञानाधिकारिणः
स्यादेव ब्रह्मजिज्ञासा तत्त्वमस्यादिभिर्गुरोः।

गुरूपदेशरहितस्य न सम्यगात्मज्ञानं प्रकाशते। तत्रात्मविद्यासंस्थितोयं। यथा कनकं कुण्डलवलयादिरूपेण विवर्तते। अविद्या च आत्मन्याश्रिता अनादिःस्थूला च सूक्ष्मा च तत्त्वावबोधकवाक्यप्रतिपादकज्ञानविपरीता। तत्रात्मनः आकाशः समुत्पद्यते। आकाशाद्वायुः। वायोरग्निः। अग्नेर्जलं। जलाद्भूमिः। भूमेर्व्रीहिः। व्रीह्यादेरन्नम्। अन्नात् पुरुषः। स पुनः पञ्चकोशवान्। कोशस्तन्मात्राणि शब्दादीनि। पुरुषस्त्रिधा—सुरनरतिर्यग्भेदेन। धर्माधिक्ये देवो जायते। अधर्माधिक्ये तिर्यक्। साम्ये तु नरः। त्वगादयो धातवः सप्ताप्यन्नपरिणामाः। न च पुंस्त्वं स्त्रीत्वं च वास्तवम्। शुक्लाधिक्ये पुमान् भवति। रक्ताधिक्ये स्त्री। साम्ये नपुंसकम्। तत्र शुक्लान्मज्जास्थिस्नायवो जायन्ते। रक्तात् त्वङ्मांसशोणिताः। एवं षट्कोशमयं शरीरम्।

बुभुक्षापिपासे शोकमोहौ जरामृतीति षडूर्मयः। एषां द्वयं द्वयं क्रमात् प्राणबुद्धिदेहेषु वर्तते। इह पञ्च कोशा भवन्ति—अन्नमयः, प्राणमयः, विज्ञानमयः, मनोमयः, आनन्दमय इति। अत्र कोशपञ्चके आत्मभ्रमो भवति वादिनाम्। तत्रानन्दमयः आत्मेति केचित्। तन्न युक्तम्। आनन्दस्य विकारासम्भवात्, सम्भवे चात्मनो अनित्यत्वप्रसङ्गात्। विकारे हि मयट्प्रत्ययः। मनोमय आत्मेत्यन्ये। तदपि न युक्तम्। मनसः कर्तृत्वाभावात्। न खलु करणं कर्ता भवति। अहङ्कारात्मवादी खलु प्रायेण मनोमयमात्मानं ब्रूते।

विज्ञानमय आत्मेति बौद्धाः। तत्रापि विकारार्थोऽनुपपन्नः। प्राणमयो देहपरिमित आत्मेत्यार्हताः। तदपि न साम्प्रतम्। मशकदेहपरिमितस्य गजदेहप्रवेशे विकासेन गजदेहपरिमितस्य मशकदेहप्रवेशे सङ्कोचेन विकारापत्तेः। अन्नमयो देह एवात्मेति चार्वाकाः। तदपि न युक्तम्, मम देह इति प्रतीतेः। आत्मविन्मते तु कर्तृत्वादिना अस्पृष्टः ग्राह्य आत्मा। स पुनः कर्ता न मुख्यः। "ब्राह्मणोग्निनातः कुर्वीते"ति विधौ किं देह एव वा आत्मा वा विशिष्टो वा कोधिकारी स्यात्। न देहः, तस्याचेतनत्वेन नाशित्वाच्च, स्वर्गसुखानुभवाभावात्। न चात्मा, तस्य ब्राह्मणत्वादिजात्यभावात्। आत्मा तु जातिवर्णाश्रमाद्यवस्थाविकाररहितः। विशिष्टस्त्वपरः कश्चिन्न देहदेहिनोः विद्यते। अतः काल्पनिक एव कर्ता भवति। न खलु साक्षादात्मा कर्तृत्वं सम्पद्यते। स च कोशपञ्चकाद् व्यतिरिक्त इत्युक्तं प्राक्। इन्द्रियाणि च नात्मा करणत्वात् दीप इव। मनसस्त्वनात्मत्वे सुषुप्तावभावोपि प्रमाणम्। तथा हि यदा आत्मा स्वपराङ्मुखोः बाह्येन्द्रियैरर्थान् भुङ्क्ते तदा जाग्रदवस्था। आत्मनस्तु विश्व इति संज्ञा। यदा पुनः बाह्यन्द्रियगृहीतार्थानात्मा मनोमात्रेण भुङ्क्ते तदा स्वप्नः। आत्मनस्तैजसः इति संज्ञा। यदा पुनर्मन एतदविद्यातिमिरग्रस्तमात्मन्यवतिष्ठते तदा सुषुप्त्यवस्था। तदा प्राज्ञ इत्यात्मनः संज्ञा। स्वापेपि प्राणस्तिष्ठति। ततो मृतत्वं प्रसज्यते। अन्यथा सारमेयादयो भक्षयेयुः। संस्कुर्युर्वा। आनन्दसद्भावोऽपि स्वापेऽस्ति, सुप्तोत्थितस्य सुखमहमस्वाप्समिति परामर्शात्।

ननु स्वापे यत्सुखं तन्न विषयजं, विषयस्याभावात्। न च निजं वेद्यत्वात्। अतो दुःखाभावे सुखमिति भ्रमोऽयम्। अथ दुःखस्य प्रतियोगिनः सतोऽदर्शने कथं तदभावो गृह्यत इति। मैवम्। प्रतियोग्यदर्शनेऽपि सर्वाभावः सुग्रहः। तथा हि मूलकात् ग्रामादागतं कञ्चित् कश्चित् पृच्छति किं तत्र देवदत्तोऽस्तीति। तदा स विमृश्य देवदत्तमदृष्ट्वापि देवदत्तस्तत्र नास्तीति ब्रूते। अत्रोच्यते। प्रतियोग्यग्रहाद्दुःखाभावो न

गृह्येत । किञ्च प्राभाकरमते नास्त्यभावाख्यं प्रमाणम् । नैयायिकमते त्वस्ति । तत् पुनः प्रत्यक्षान्न विशिष्यते ।

सुखदुःखादिनिर्मुक्तं
मोक्षे पाषाणवत्स्थितम् ।
आत्मानं प्रवदन् वादी
मूर्खः किं न वदत्यसौ ॥

इत्यास्तामेतत् ।

केचित् पुनरात्मनानात्वं ब्रुवते । विरुद्धधर्माध्यासादेकस्मिन्मृते अन्यो जीवति न म्रियते । एकस्मिन् जाते अन्यो न जायते । एकस्मिन् सुखिनि नान्ये सर्वेऽपि सुखिनो भवन्ति । नैतद्युक्तम् । उपाधिभेदादेव भेदप्रतिभासः । यथा ग्रीष्मे जाह्नव्यामर्द्धावगाढस्य पुंसः पादे मे सुखं शिरसि वेदनेति प्रतीतेः । तस्मादेक एव आत्मा देहाहङ्कारप्राणबुद्धीन्द्रियमनोव्यतिरिक्तः सकलदेहेषु निर्विकारो निरञ्जनो कर्ता नित्यः स्वयंज्योतिर्भोगवर्जितो निर्गुणः शुद्धः बोधमात्रवपुः । स त्वविद्योपाधिवशात् कर्ता भोक्ता च रागादिकलुषितश्च भवति । सा च अविद्या तत्त्वमस्यादिवाक्यार्थपरामर्शद्वारा ब्रह्माहमस्मीति भावनाबलात् क्रमेण निवर्त्यते । तस्यां निवृत्तायां मुक्तस्वरूप आत्मा कैवल्येऽपि शुद्धः सद्रूप आस्ते । स एव मोक्ष इति शिवम् ।

इति समाप्तः